## श्रीमद्भगवद्गीता (Epi – 2)

**Means of conflict resolution**

**Importance of knowledge**

ज्ञानगुरुत्वविषये अपरं श्लोकमुक्तं श्रीभगवता –

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।

तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥ (गी.४।३८)

अन्वयः - इह ज्ञानेन सदृशं पवित्रम् हि न विद्यते। कालेन योगसिद्धः स्वयं आत्मनि तत् विन्दति।[1]

व्याख्या – इह संसारे यत् किमपि शुद्धिकरं पवित्रं वा वस्तु विद्यते तेषु ज्ञानस्य तुल्यं किमपि नास्ति। ज्ञानमेव प्रधानं पावनं तत्त्वम्। आत्मनः विशेषगुणः ज्ञानमिति। तस्य सदृशमपि किञ्चित् नास्ति। कालक्रमेण तत् पवित्रं तत्त्वज्ञानं योगसिद्धजनः स्वयं चित्ते लभते। अर्थात् मुमुक्षुः कालगते स्वकीये हृदये ज्ञानस्य उपलब्धिं अनुभवति।

अथ ज्ञानलाभार्थं कस्याः योग्यतायाः आवश्यकता अस्ति? तद्विषये परवर्तीं श्लोकमाह -

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।

ज्ञानं लब्ध्वा परां शान्तिंमचिरेणाधिगच्छति॥ (गी.४।३९)

अन्वयः – श्रद्धावान् तत्परः संयतेन्द्रियः ज्ञानं लभते। ज्ञानं लब्ध्वा अचिरेण परां शान्तिम् अधिगच्छति।[2]

व्याख्या – ज्ञानप्राप्तये योग्यः कः? सः अधुना आलोच्यते। श्रद्धालुजनः, गुरुसेवापरायणजनः, इन्द्रियसंयमकारिजनश्च ज्ञानलब्धुं शक्नुमः। तत्परः नामः गुरु-उपासनादौ अभियुक्तः। संयतानि विषयेभ्यः निवर्तितानि यस्य इन्द्रियानि स संयतेन्द्रियः। यदि भावपूर्वकजिज्ञासा न भवेत् तर्हि

---

[1] ইহলোকে জ্ঞানের সদৃশ পবিত্র আর কিছু নেই। কালক্রমে মুমুক্ষু ব্যক্তি স্বয়ং আত্মাতে সেই তত্ত্বজ্ঞান লাভ করে।

[2] শ্রদ্ধাবান, তৎপর এবং সংযতেন্দ্রিয় জ্ঞান লাভ করেন। জ্ঞান লাভ করে অচিরেই পরা শান্তি প্রাপ্ত হন।

तत्त्वदर्शिणः शरणागतेऽपि ज्ञानलाभः न भवति। परन्तु केवला श्रद्धा अपर्याप्ता । श्रद्धावान मन्दप्रयत्नशीलः अपि भवितुम् अर्हति। अतः महापुरुषेण समीचीनमार्गे गमनः आवश्यकः भवति। पुनश्च इन्द्रियसमूहाणां संयमः अनिवार्यः। यः वासनायाम् मग्नः तस्य समीपे ज्ञानप्राप्तिः दूरुहा। तदनन्तरं भगवता उच्यते ज्ञानं लब्ध्वा पुरुषः तत्क्षणादेव परमशान्तिं लभते। सा शान्तिः परा, यतः सा अन्तिमा शान्तिः इति। मोक्षशब्देणापि सा कथनीया।

ज्ञानलाभात् संशयः दूरीभूतः भवति। अथ श्रीकृष्णः आह -

तस्मादज्ञानसम्भूतं हृतस्थं ज्ञानासिनात्मनः।
छित्त्वैनं संशयं योगमातिष्ठोतिष्ठ भारत।। (गी.४।४२)

अन्वयः – भारत! तस्माद् आत्मनः अज्ञानसम्भूतं हृतस्थम् एनं संशयं ज्ञानासिना छित्त्वा योगम् आतिष्ठ, उत्तिष्ठ। [3]

व्याख्या – श्रीकृष्णः वदति, हे भारतवंशीय अर्जुन! चित्तस्य संशयदूरीकरणाय योगे अवस्थानं प्रयोजनम्। तस्माद् अज्ञानजातं स्वकीयहृदयस्थितस्य एतस्य संशयस्य विनाशः अत्यावश्यकः। अतः ज्ञानरूपतरवारिणा चित्तसंशयस्य छेदनं कृत्वा युद्धाय उत्तिष्ठ। वस्तुतः एषः युद्धः मानसिकः। अत्र शत्रुः अन्तरे विराजमानः। स शत्रुः संशयरेव। अस्माकं सुचिन्ताकाले संशय सदा वाधारूपेण उपस्थितः भवति शत्रुरूपेण च भयानकं आक्रमणं करोति। संयमेन सह यज्ञविधिविशेषस्य आचरणं कृत्वा एतानि विकारानि अतिक्रम्यते। सः एव युद्धः उच्यते। अस्य परिणामः मोक्षः।

*********

■ To be continued …

[3] হে ভারত! সেই জন্য নিজের অজ্ঞানসম্ভূত হৃদয়স্থ এই সংশয়কে জ্ঞানরূপ অসি দ্বারা ছেদন করে কর্মযোগ অবলম্বন কর এবং যুদ্ধের জন্য ওঠ।